श्री लक्ष्मीधर विरचित —

# अद्वैतमकरन्द

— श्री स्वयंप्रकाशयतिकृत टीका सहित

PDF Creation and Uploading by: Hari Parshad Das (HPD) on 15 November 2014.

# INTRODUCTION.

A unique feature of the Advaita philosophy as taught by Sri Sankaracharya is that it can bear summing up in the shortest compass. In the words of the late M. N. Dvivedi it can be expressed "in half a verse or a quarto volume of many hundred pages." This philosophy which in the words of Dr. Theodore Goldstucker "is the sublimest machinery set in motion by oriental thought" yet rests upon a minimum number of postulates and needs for its defence but a few simple arguments based upon the facts of our daily experience.

It is this profound simplicity which has enabled Vedanta writers to compose those gems of short treatises or Prakaranas as they are styled which so richly abound in the literature of the Advaita Vedanta and which in a few telling but homely verses bring home the cardinal doctrines of Advaita even to the unlettered multitude. The *Advaita-makaranda* of Lakshmidhara is one of these priceless gems. Its marvellous brevity and the compelling force of its arguments remind one of the

still more wonderful *Dasasloki* of Sri Sankaracharya. In the short compass of 28 clean-cut anushtubh slokas the entire philosophy of the Advaita is dealt with, with a comprehensiveness, simplicity and precision which are simply admirable. The closely reasoned thesis contained in each sloka can well be expanded into a volume. The commentator is therefore thoroughly justified when he states "यद्यप्यत्र प्रतिश्लोकं बहु वक्तव्यमस्ति तथापि मन्दबुद्धीनामलसानां व्युत्पादनार्थं प्रवृत्तेन मया ग्रन्थकाठिन्यगौरवभयादुपरतम्" In fact the *Advaitamakaranda* must be got up by heart by those who want to provide themselves with an armoury of arguments in defence of the Advaita position.

Of Lakshmidhara Kavi the author of the *Advaitamakaranda* we have very little information. Besides the *Advaitamakaranda* he has composed *Amritatarangini* a commentary on the Srimad Bhagavata and *Bhagavannamakaumudi*. At the end of the latter work he says: येन भागवतव्याख्या कृतामृततरङ्गिणी अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥ (*vide* p. 878 of the Triennial Catalogue of Mss. collected for the Government Oriental Manuscripts Library Madras). From the *Bhagavannamakaumudi*

we also learn that Lakshmidhara was the disciple of Anantananda Raghunatha Swami.

Regarding his date no positive information is forthcoming. Mahamahopadhyaya Vasudeva Sastri Abhyankar of Poona, in his valuable edition of *Sarvadarsanasangraha* (p 538) assigns Lakshmidhara to 1320 A. D. No ground is however stated for this statement. Bodhendra Sarasvati the renowned devotee and apostle of the namakirtana cult in South India states in his *Bhagvannamamritarasodaya* that Lakshmidhara flourished in the reign of King Bhojaraja of the 11th Century A. D. (नामकौमुद्यां भोजराजेन पूजितश्श्रीधरकविभिः). This statement also requires confirmation, coming as it does from a writer who flourished so late as the second half of the 18th century A. D. A critical examination of *Bhagavannamakaumudi* and *Bhagavata tika* may furnish details regarding Lakshmidhara. As we have at present no access to these works we shall simply content ourselves with determining the latest date beyond which Lakshmidhara cannot be placed.

*Firstly* Lakshmidhara's *Bhagavannamakaumudi* was commented upon by Anantadeva (or

Nandadeva as is found in some Mss.) son of the celebrated Mimamsa writer Apadeva and the author of *Smritikaustubha, Bhattalankara* (a commentary on his father's *Mimamsanyayaprakasa*) and *Siddhantatattva* a treatise on Advaita Vedanta. In his *Smritikaustubha* Anantadeva states that he was a protege of Baj Bahadur king of Kurmachala who flourished between 1644 and 1664 A. D. Hence Lakshmidhara could not have flourished later than the beginning of the 17th Century A. D.

Secondly Brahmananda Bharati the author of the commentary on Bharati Tirtha's *Vakyasudha* alias *Drigdrisyaviveka* quotes Lakshmidhara by name in his comments on the 46th sloka (अस्य साक्षिण: साक्षित्वं साक्ष्यपेक्षं न तु वास्तवमित्येतदपि अद्वैतमकरन्दकारैर्निरूपितं चैत्योपरागरूपा मे साक्षितापि न तात्त्विकी उपलक्षणमेवेय निस्तरङ्गचिदम्बुधेरिति । Brahmananda Bharati is also the author of *Purusharthaprabodha*, a treatise devoted to the exaltation of Siva in the light of the Advaita Vedanta. Now Appaya Dikshita (1554 to 1626 A. D.) refers to *Purusharthaprabodha* in his *Sivatattvaviveka* "पुरुषार्थप्रबोधे हि पूजायाः पार्वतीपतेः । नित्य सदा यावदायुर्न कदाचिदतिक्रमेत ॥ इत्युक्त्यातिक्रमे दोषश्रुतेरत्यागचोदनात् ।

कलश्रुतेर्वाक्सया च नित्यमुपपादितम् ॥ स्फुटं तत्रैव तत्सर्वमिति नेह विलिख्यते" (page 140 of the Kumbakonum Edition). And from the fact that Brahmananda Bharati has commented upon the work of Bharatitirtha, the Guru of Sri Vidyaranya who flourished at the close of the 14th century A. D. it is clear that he lived between the 15th and 17th centuries A. D. We may not be far wrong if we assign Brahmananda Bharati to the end of the fifteenth century. Lakshmidhara who is quoted by Brahmananda Bharati must have lived in the first half of the fifteenth century A. D. at the latest. As already stated by us we have for the present to rest satisfied with this piece of negative evidence.

The commentator Svayamprakasa Yati describes himself as the disciple of Kaivalyananda Yogindra. He also pays obeisance to Suddhananda, Sivananda and Sacchidananda. Besides this commentary (रसाभिव्यञ्जिका) on the *Advaitamakaranda* he has also composed the following works (1) हरितत्त्वमुक्तावलिः, a commentary on Sri Sankaracharya's *Haristuti* (2) तत्त्वसुधा, a commentary on Sri Sankaracharya's *Dakshinamurtistotra* (3) A commentary on the *Manisha Panchaka* of Sri Sankaracharya.

All the above works are available in print. Nothing definite is known about his date. He may be safely identified with the Svayamprakasa Yati, the teacher of Mahadevananda Sarasvati who wrote the *Tattva-nusandhana* and its commentary *Advaitachinta-kaustubha* and of Achyutakrishnanandatirtha the commentator of *Siddhantalesasangraha* who according to tradition, lived 180 years ago on the banks of the Kaveri in the Trichinopoly District. Svayamprakasa's commentaries are full, lucid and to the point. The numerous apt quotations from Advaita classics show the extent of his erudition. In short, both the *Advaitamakaranda* and its commentary deserve the careful perusal of those who are interested in the study of the Advaita philosophy. Mr. T. K. Balasubrahmanya Aiyar, the Managing Director of the Sri Vani Vilas Syndicate Ltd., is to be congratulated on his choice of this admirable treatise for inclusion in "The Sastra Booklet Series."

Tirutturaipundi
4—8—26

*R. Krishnaswami Sastri.*

P. S. After the above introduction was finished we had occasion to look into the "List of Mss. collected for the Government Mss. Library" published

by the Bhandarkar Oriental Research Institute Poona 1925. On page 44 of the List against serial number 300 the following entry occurs:— "अद्वैतमकरन्दव्याख्या स्वयंप्रकाशानन्दः लिपिकालः श० 1626" (1704 A. D.). This date, we are glad to note, strikingly confirms our identification of the commentator of the *Advaitamakaranda* with Svayamprakasayati the guru of Achyutakrishnananda who lived about 180 years ago. Perhaps the Poona manuscript might have been written by the commentator himself.

॥ श्रीः ॥

# ॥ अद्वैतमकरन्दः ॥

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्भयम् ।
श्रुत्वा तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥ १ ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥ २ ॥

कैवल्यानन्दयोगीन्द्रपादकंजरजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनिवर्तकः ॥ ३ ॥

शुद्धानन्दपदाम्भोजद्वन्द्वं सेवे यदुद्भवम् ।
निर्वाणरसमास्वाद्य हृष्टाः शिष्यालिपङ्क्तयः ॥ ४ ॥

सच्चिदानन्दयोगीन्द्रा जयन्ति भुवि केचन ।
यत्कृपालवतस्तीर्णो मया संसारवारिधिः ॥ ५ ॥

इह खलु लक्ष्मीधरो नाम कश्चित्कवीन्द्रो निरन्तरनित्याद्यनुष्ठानशुद्धस्वान्ततया संजातविवेकवैराग्यशमादिमुमुक्षा-

वत आत्मविविदिषया संत्यक्तलोकवेदधर्मान्गुरुवरचरणोप-सर्पणपुरःसरं सम्यक्श्रुतवेदान्ततत्त्वेऽप्यसंभावनादिप्रतिबद्ध-ज्ञानतयापरितुष्यतः कांश्चित्पुरुषधौरेयानुपलभ्य संजातकरु-णस्तेषां करतलबिल्वफलवत्स्फुटं वेदान्तप्रतिपाद्यं ब्रह्म सच्चि-दानन्दलक्षणं सर्वज्ञं सर्वोपादानं नित्यं सर्वगमद्वयं देहेन्द्रिय-प्राणमनोबुद्ध्यहंकारसाक्षि प्रत्यगभिन्नतया तर्कैः संभावयितुं किंचित्प्रकरणमद्वैतमकरन्दाख्यमारभमाणश्चिकीर्षितस्य तस्या-विघ्नेन परिसमाप्तये स्वेष्टदेवताप्रणामरूपं मङ्गलं स्वयमनुष्ठाय शिष्यशिक्षायै ग्रन्थतो निबध्नाति—

कटाक्षकिरणाचान्त-
नमन्मोहाब्धये नमः ।
अनन्तानन्दकृष्णाय
जगन्मङ्गलमूर्तये ॥ १ ॥

कटाक्षो भक्तेषु तिर्यक्पातिता कृपादृष्टिः, तस्याः किर-णेन प्रभयाऽऽचान्तः शोषितो नमतां नमस्कर्तॄणां मोहोऽ-ज्ञानम्, स एवाब्धिः समुद्रो येन स तथा तस्मै । श्रीगुरुप-रमेश्वरप्रसादरहितानां दुस्तरत्वाद्भ्रान्तिपरम्परातरङ्गयुक्तत्वा-द्रागादिमहाग्राहादियोगाच्च युक्तमज्ञानस्य समुद्रत्वम् । अन-न्तानन्दकृष्णाय, अनन्तो देशकालवस्तुपरिच्छेदशून्य आन-

न्दः स्वरूपं यस्य सोऽनन्तानन्दः, स चासौ कृष्णश्चानन्तानन्दकृष्णो वसुदेवकुमारस्तस्मै, जगन्मङ्गलमूर्तये जगतां लोकानां मङ्गलभूता सुखाभिवृद्धिकरी मूर्तिर्विग्रहो यस्य स तथा तस्मै नमोऽस्तु । यद्वा कटाक्षः प्रतिभाक्षममन्तःकरणम् , तस्य किरणो वाक्यजन्यतद्वृत्तिप्रतिफलितं चैतन्यम् , तेनाऽऽचान्तो भक्षितो नमतां स्वात्मप्रवणानामन्तर्मुखाणां श्रवणादिपराणां मोहोऽज्ञानमेवाब्धिरसंख्याध्यासपरम्पराकल्लोलोदयहेतुत्वादनेकानर्थदुष्टग्राहादियोगाच्च येन तस्मै, यद्वा कटाक्षोऽन्तिमप्रमाणं वाक्यजन्यवृत्तिरेव, तदनन्तरं सर्वबाधेन प्रमाणादिव्यवहाराप्रवृत्तेः 'यत्र त्वस्य—' इत्यादिश्रुतेः । अन्यत्पूर्ववत् । यद्वा कटाक्षः कटाक्षवत्प्रसृतमपरोक्षं स्वरूपचैतन्यमेव 'दिवीव चक्षुराततम्' 'यत्साक्षादपरोक्षाद्ब्रह्म' इत्यादिश्रुतेः, तस्य किरणेन । शेषं पूर्ववत् । अत्र पक्षे 'कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः' इति कृष्णशब्दार्थो द्रष्टव्यः । जगतां मङ्गलकरी मूर्तिर्यस्य तस्मै, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' 'एष ह्येवानन्दयाति' इत्यादिश्रुतेः । जगन्मङ्गलमूर्तय इत्यनेन स्मृतिमात्रेण तस्यैहिकामुष्मिकपुरुषार्थपरिपन्थिविघ्ननिराससामर्थ्यमुक्तम् , मङ्गलस्य तादृशत्वात् ॥ १ ॥

एवमनुष्ठितस्वेष्टदेवतानमस्कारलक्षणमङ्गलानिर्वाहितसकलो-

न्तराय: प्रथमं तत्त्वमस्यादिवाक्यैस्तात्पर्ययुक्तैर्बोधितं प्रत्यगात्मनो ब्रह्मत्वं युक्त्या संभावयन्नाह—

**अहमस्मि सदा भामि**
**कदाचिन्नाहमप्रियः ।**
**ब्रह्मैवाहमतः सिद्धं**
**सच्चिदानन्दलक्षणम् ॥ २ ॥**

अहमहंकारादिसाक्षी, अस्मि सद्रूपो भवामि, आत्मन्यध्यस्ताहंकारादेः सत्ताप्रदत्वात्; सदावस्थात्रयेऽपि भामि जाग्रति देहेन्द्रियादिसाक्षितया स्वप्नेऽन्तःकरणवासनाप्रपञ्चसाक्षितया सुषुप्तावज्ञानसाक्षितया च प्रकाशे; कदाचित्कदाचिदपि दुःखाद्यनुभवकालेऽप्यहं नाप्रियो भवामि नानिष्टो भवामि, किं तु सदा प्रिय एव भवामि, दुःखादौ द्वेषस्यात्मस्नेहनिमित्तत्वाच्छत्रुदुःखादौ द्वेषस्यादर्शनात्, तथा च परमप्रीतिविषयत्वादानन्दरूपः। यस्मात्कालत्रयेऽप्यबाध्यमानत्वात्सद्रूपः प्रकाशमानत्वाच्चिद्रूपः परमप्रीतिविषयत्वादानन्दरूपश्च, तस्मादहं सच्चिदानन्दलक्षणं सच्चिदानन्दरूपं ब्रह्मेति सिद्धम्। अत्रेदमनुमानं विवक्षितम्— 'प्रत्यगात्मा ब्रह्मणो न भिद्यते सच्चिदानन्दरूपत्वाद्ब्रह्मवत्' इति। न च हेतुरसिद्धः, 'अहमस्मि' इत्यादिना तस्य साधितत्वात्।

नन्वनुमानस्य 'नाहमीश्वरः' इति प्रत्यक्षविरोध इति चेत्; न तावदात्मनो ब्रह्मत्वे बाह्यप्रत्यक्षविरोधः, आत्मनि रूपाद्यभावेन बाह्यस्य तत्राप्रवृत्तेः; नापि मानसप्रत्यक्षविरोधः, मनसो मनःसाक्षिण्यात्मनि प्रवृत्तेरसंभवात् । ननु 'जीवेश्वरौ भिन्नौ किंचिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धधर्माधारत्वाद्दहनतुहिनवत्' इत्याद्यनुमानविरोध इति चेत्; न, विरुद्धधर्मवतोर्बिम्बप्रतिबिम्बयोरुच्चमन्दशब्दाधार आकाशे च व्यभिचारात् । ननु 'द्वा सुपर्णा—' इत्यादिश्रुतिविरोध इति चेत्; न, तस्या अतत्परत्वेन तत्त्वमस्यादिश्रुत्या बाध्यमानत्वात् । तस्मात् 'नाहमीश्वरः' इति बुद्धिर्देहाद्युपाधिनिमित्ता भ्रान्तिर्न तु शुद्धजीवस्वरूपविषया । तदुक्तम्—

'त्वयि मयि च गण्यमाने मशकान्मशकोऽहमेव देहदृशा ।
विश्वाधिकश्च ते मे मद्बोधानन्दपूर्णता तुल्या ॥' इति ।

अतोऽहं ब्रह्मैवेति भावः ॥ २ ॥

ननु 'यः सर्वज्ञः सर्ववित्' इत्यादिश्रुत्या हि ब्रह्म सर्वज्ञतयावगम्यते 'यतो वै—' इत्यादिश्रुत्या च सर्वजगत्कारणतया च; प्रत्यगात्मा तु स्वशरीरादिकमपि साकल्येन न जानाति स्वातन्त्र्येण किंचित्कर्तुमपि न शक्नोति; तत्कथमस्य सर्वज्ञेन सर्वकारणेन च ब्रह्मणाभेद इत्याशङ्क्य प्रत्यगात्मनोऽपि तद्द्वयमुपपादयति—

मय्येवोदेति चिद्व्योम्नि
जगद्गन्धर्वपत्तनम् ।
अतोऽहं न कथं ब्रह्म
सर्वज्ञं सर्वकारणम् ॥ ३ ॥

चिद्व्योम्नि चिदाकाशे मयि प्रत्यगात्मन्येव जगद्गन्धर्वपत्तनं जगदेव गन्धर्वपत्तनम्, ऐन्द्रजालिकविक्षुब्धमाययाऽऽवरणावस्थायां च मेघेषु प्रतीयमानं नगरं गन्धर्वपत्तनं नाम, तादृशमिदं जगदुदेति, उत्पद्यत इत्यर्थः । अयं भावः—मिथ्यापदार्थस्य हि द्रष्टैवोपादानम्, यथा स्वप्नप्रपञ्चस्य तत्साक्षी, तथा जाग्रत्प्रपञ्चस्यापि सर्वस्य दृश्यत्वेन मिथ्यात्वात्तद्द्रष्टा प्रत्यगात्मैवोपादानमिति वक्तव्यम् । तदुक्तम्—'यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः । एवं जाग्रत्प्रपञ्चश्च मयि मायाविजृम्भितः ॥' इति । एवं च प्रत्यगात्मनस्तद्द्रष्टृत्वलक्षणं सर्वज्ञत्वं तदधिष्ठानत्वलक्षणं सर्वकारणत्वं च सिध्यति । ननु बहुदूरव्यवहितमेर्वादीनामदृश्यमानानां कथं प्रत्यगात्मा द्रष्टा कथं वा तदुपादानमिति चेत्; शृणु तर्हि रहस्यम्—'एतावन्तं कालं मेर्वादिकमहं नाज्ञासिषम्' इति ह्यज्ञानविशेषणतया मेर्वादिकं स्मर्यते; तच्च स्मरणं मेर्वाद्यनुभवं विनानुपपद्यमानं तन्मेर्वाद्यनुभवं कल्पयति, तत्र चेन्द्रियादीनामप्रवृत्तेः प्रत्य-

गात्मचैतन्येऽध्यस्ततयैव मेर्वाद्यनुभवो वक्तव्यः । अध्यस्तस्य चाधिष्ठानमेवोपादानं तद्भानादेव भानं च भवति । तथा च प्रत्यगात्मा स्वाध्यस्तमेर्वादेरप्यज्ञाततया साक्षी तदुपादानं च भवति । तदुक्तं ब्रह्मगीतायाम्— 'ज्ञातरूपेण चाज्ञातस्वरूपेण च साक्षिणः । सर्वं भाति तदाभाति ततस्तद्व्यापि सर्वदा ॥' इति । तथा च प्रत्यगात्मा सर्वज्ञः सर्वकारणं चेति । यत उक्तप्रकारेण सर्वकारणं चाहमतः कथं तद्रूपं ब्रह्म न भवामि? भवाम्येवेत्यर्थः ॥ ३ ॥

ननु 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्' इत्याद्युपनिषत्सु नित्यं ब्रह्म श्रूयते, आत्मा च मरणादिधर्मकत्वादनित्य एवानुभूयते, ततश्च न तयोरैक्यमित्याशङ्क्य किमात्मनो बौद्धपक्ष इव स्वत एव नाशं ब्रवीषि, उत दण्डसंयोगाद्घटस्येवान्यसंबन्धादात्मनो नाशं ब्रवीषि, अथ वा पटनाशात्पटगतरूपादिवदाश्रयनाशान्नाशं ब्रवीषि, इति विकल्प्याद्यं प्रत्याह—

## न स्वतः प्रत्यभिज्ञानात्

मे प्रत्यगात्मनो मम न स्वतो नाशो भवति । तत्र हेतुः —प्रत्यभिज्ञानात्, आत्मनः प्रत्यभिज्ञायमानत्वात् । प्रत्यभिज्ञानं नाम पूर्वमनुभूतस्य कालान्तरे प्रमाणेन तत्तोल्लेखपूर्वकं ज्ञानम् । आत्मा हि 'योऽहं बाल्ये पितरावन्वभूवं

स एवेदानीं स्थविरे प्रणप्तॄननुभवामि', 'सोऽहं सुप्तः स्वप्नमद्राक्षं स एवेदानीं जागर्मि' इति च बाल्याद्यवस्थासु जाग्रदाद्यवस्थासु च प्रत्यभिज्ञायते । तच्च प्रत्यभिज्ञानमात्मनो निर्निमित्तनाशे नोपपद्यते । तथा हि— आत्मनो हि स्वतो नाशे प्रतिक्षणमन्योऽन्य आत्मेति वक्तव्यम् । तत्र कथं वान्योऽन्येन 'सोऽहम्' इति प्रत्यभिज्ञायेत ? आत्मा च 'सोऽहम्' इत्यात्मानं प्रत्यभिजानाति । तस्मान्न तस्य स्वतो नाश इत्यर्थः । न द्वितीय इत्याह—

## निरंशत्वान्न चान्यतः ।

निरंशत्वादंशरहितत्वान्निरवयवत्वात्, अन्यतो हेतुसंयोगादप्यात्मनो न नाश इत्यर्थः । आत्मा हि चिद्रूपत्वान्निरवयवः । यदि चिद्रूपस्यात्मनः सावयवत्वमुच्येत तर्हि वक्तव्यम्, आत्मावयवाश्चेतना अचेतना वा ? नाद्यः, आत्मावयवानां हि प्रत्येकं चेतनत्वे विरुद्धाभिप्रायकतया शरीरमुन्मथ्येत । न द्वितीयः, अचेतनैरवयवैरारब्धस्यात्मनोऽप्यचेतनत्वप्रसङ्गात्; न ह्यचेतनैस्तन्तुभिरारब्धः पटश्चेतनो दृश्यते; ततो निरवयव एवात्मा; न निरवयवे चात्मनि हेतुसंयोगः संभवति, तस्यैकदेशवृत्तित्वात् । अतोऽन्यतोऽप्यात्मनो न नाश इति भावः । नापि तृतीय इत्याह—

**न चाश्रयविनाशान्मे**
**विनाशः स्यादनाश्रयात् ॥ ४ ॥**

आश्रयविनाशादाधारविनाशादपि मे मम विनाशो न स्यात् । कुतः? अनाश्रयात्, आश्रयस्याधारस्याभावात् । आत्मा हि गुणक्रियाजात्याद्यन्यतमत्वाभावादनाश्रयः, निरवयवत्वाच्च नापि घटवदाश्रयः । अत आश्रयनाशादप्यात्मनो न नाशः । आत्मनो मरणादिप्रतीतिस्तु देहाद्युपाधिकृता । तदुक्तं सूत्रकृता—'चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्' इति । अस्य चार्थो विद्यारण्यगुरुभिरधिकरणरत्नमालायां दर्शितः—'जीवस्य जन्ममरणे वपुषो वाऽऽत्मनो हि ते । जातो मे पुत्र इत्युक्तेर्जातकर्मादितस्तथा ॥' इति पूर्वपक्षे प्राप्ते, सिद्धान्तमाह—'मुख्ये ते वपुषो भाक्ते जीवस्यैते अपेक्ष्य हि । जातकर्म च लोकोक्तिर्जीवापेतेति शास्त्रतः ॥' इति । ततस्त्रिविधनाशाभावान्नित्य एवात्मेति तस्य ब्रह्मणाभेदः सम्यग्घटत इति भावः ॥ ४ ॥

हेतुसंयोगादात्मनो न नाश इति द्वितीयं पक्षं प्रपञ्चयति—

**न शोषप्लोषविक्लेद-**
**च्छेदाश्छिन्नभसो मम ।**

**सत्यैरप्यनिलाग्न्यम्भः-**
**शस्त्रैः किमुत कल्पितैः ॥ ५ ॥**

छिन्नभसच्चिदाकाशस्य ममात्मनोऽनिलेन वायुना न शोषः शोषणं पत्रफलादेरिव भवति, नाप्यग्निना प्लोषो दाहः पटादेरिव भवति, नाप्यम्भसा जलेन सस्यादेरिव विक्लेदः क्लेदनं भवति, नापि शस्त्रेणायुधेनेक्षुदण्डादेरिव च्छेदो द्वैधीभावो भवति, आकाशस्येवात्मनो निरवयवत्वेन वाय्वादिभिः संबन्धाभावादित्यर्थः । व्यावहारिकसत्यस्य भूताकाशस्यैव हि निरवयवत्वेनासङ्गत्वादाकाशतुल्यसत्यैरप्यनिलादिभिः शोषादयो न भवन्ति, आत्मनि मायाकल्पितत्वेन मिथ्याभूतैर्वाय्वादिभिर्वस्तुतोऽद्वितीयस्यासङ्गस्यात्मनः शोषादयो न संभवन्तीति किमु वक्तव्यमित्यर्थः । तदुक्तं भगवता—
'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥' इति ॥ ५ ॥

ननु प्रत्यगात्मा परिच्छिन्न एवानुभूयते, 'अहमिहास्मि' इति प्रतीतेः; ब्रह्म च सर्वगतम्, 'नित्यं विभुम्' इत्यादिश्रुतेः; अतो नायं ब्रह्मेत्याशङ्क्य, आत्मनः सर्वगतत्वं युक्त्या संभावयन्नाह—

**अभारूपस्य विश्वस्य**
**भानं भासंनिधेर्विना**
**कदाचिन्नावकल्पेत**
**भा चाहं तेन सर्वगः ॥ ६ ॥**

अभारूपस्याचिद्रूपस्य, जडस्येत्यर्थः; विश्वस्य जगतो भानं प्रकाशो भासंनिधेर्विना भासंनिधिं विना, चैतन्यसंबन्धं विनेत्यर्थः; कदाचित्कदाचिदपि नावकल्पेत न संभवेत् । भा चैतन्यरूपश्चाहं प्रत्यगात्मा । तेन जडसर्वप्रपञ्चभासकत्वेन प्रत्यगात्मा सर्वगः, सर्वगतो भवामीत्यर्थः । बहुयोजनदूरवर्ति चन्द्रसूर्यमण्डलं ततोऽप्यतिदूरवर्ति ध्रुवादि नक्षत्राणि च प्रत्यगात्मनो भासन्ते । तच्च भानं जडानां तेषां स्वतो न संभवति, किं तु स्वप्रकाशरूपात्मचैतन्यसंबन्धबलेनैव तद्वक्तव्यम्, स्वतोऽप्रकाशस्य घटादेः स्वप्रकाशदीपादिसंबन्धबलेनैव प्रकाशदर्शनात् । यदि प्रत्यगात्मात्रैव तिष्ठेत्कथं ध्रुवादिना संबध्येत ? ततो ध्रुवादिभासकत्वात्प्रत्यगात्मा सर्वगतः । परिच्छिन्नताप्रतीतिश्च आत्मनोऽभिव्यञ्जकोपाधिपरिच्छेदाद्भ्रान्त्योपपद्यते । तदुक्तं ब्रह्मगीतायाम्—‘ स्वयं भातुमशक्तं हि जडात्मकमिदं जगत् । चित्संबन्धबलेनैव खलु भाति न चान्यथा ॥ स्वाभिव्यञ्जकसंकोचात्संकोचप्रतिभात्मनः ।

न स्वरूपेण चिद्रूपः सर्वव्यापी सदा खलु ॥' इति । ततो जीवात्मा ब्रह्मैवेति भावः ॥ ६ ॥

ननु जीवस्य ब्रह्माभेदोऽसंगतः, ब्रह्मण एवासिद्धेः; देशकालवस्तुपरिच्छेदशून्यं वस्तु हि ब्रह्मोच्यते; न च तत्संभवति, कालाकाशादेर्द्वितीयस्य विद्यमानत्वेन वस्तुपरिच्छेदाभावस्यासिद्धेः ; न चाकाशादेर्ब्रह्मण्यारोपितत्वेन मिथ्यात्वात्तेन तस्य न सद्वितीयत्वमिति वाच्यम्, आकाशादेरध्यस्तत्वे मानाभावात्; न च 'आत्मन आकाशः संभूतः' इति श्रुतिस्तत्र मानमिति वाच्यम्, तत्राकाशादेर्ब्रह्मकार्यतामात्रप्रतीतेः, इत्याशङ्क्य ब्रह्मणोऽद्वितीयत्वसिद्धय आकाशादेरध्यस्तत्वं साधयति—

> **न हि भानादृते सत्त्वं**
> **नर्ते भानं चितोऽचितः ।**
> **चित्संभेदोऽपि नाध्यासा-**
> **दृते तेनाहमद्वयः ॥ ७ ॥**

भानादृते प्रकाशं विना पदार्थस्य सत्त्वं सद्भावो नास्ति, अप्रकाशमानशशविषाणादेः सत्त्वादर्शनादित्यर्थः । ततः किम्? तत्राह—नर्ते इत्यादिना । अचितो जडस्य चित ऋते

चैतन्यस्य संबन्धं विना भानं प्रकाशो नास्ति, स्वतो भानवत्त्वे जडत्वाभावप्रसङ्गादित्यर्थः । ततोऽपि किम् ? तत्राह—चित्संभेद इत्यादिना । चित्संभेदोऽपि चैतन्यसंबन्धोऽप्यध्यासादृते चित्यारोपितत्वं विना जडस्य न संभवतीत्यर्थः । अयं भावः—चिज्जडयोराध्यासिकसंबन्धातिरिक्तं संबन्धं वदन्वादी प्रष्टव्यः, किं तयोः संबन्धः संयोगः, उत समवायः, अथ तादात्म्यम्, अथ वा विषयविषयिभाव इति । नाद्यः, चितोऽद्रव्यत्वेन संयोगानुपपत्तेर्गुणाश्रयस्यैव द्रव्यत्वाच्चितो निर्गुणत्वात् । नापि समवायः, चिज्जडयोर्गुणगुण्यादिष्वन्यतमत्वाभावात् । ननु चिज्जडयोः कार्यकारणभावात्तन्तुपटयोरिव समवायोऽस्त्विति चेत्; न, तन्तुपटयोः समवायेऽवयवावयविताया एव प्रयोजकत्वेन कार्यकारणभावस्याप्रयोजकत्वात्, अन्यथा तुरीपटयोरपि समवायप्रसङ्गात्, अवयवावयवितायाश्च दृग्दृश्ययोरभावात् । नापि तादात्म्यम्, परस्परविलक्षणयोस्तयोस्तादात्म्यासंभवात् । नापि विषयविषयिभावः, तस्य मूलसंबन्धपूर्वकत्वात्, तदसंभवस्य चोक्तत्वात्, अन्यथातिप्रसङ्गात् । तदुक्तं सर्वज्ञात्ममुनिभिः—'न संकरो नापि च संयुतिस्तयोर्न चास्ति तद्वत्समवायसंभवः । अतो न चिच्चैत्यसमन्वयं प्रति प्रतीयते काचन मूलसंगतिः ॥' इति । ततस्तयोराध्यासिक एव

संबन्ध इति वाच्यम् । तथा च जडपदार्थभानान्यथानुपपत्तिरेवाकाशादेरध्यस्तत्वे प्रमाणम् । तदपि तैरेवोक्तम्—'ततो वियन्मुख्यमदो जगज्जडं चिदात्मनोऽस्यैव विवर्त इष्यताम् । अनाद्यविद्यापटसंवृतात्मनस्तदोपलभ्यत्वममुष्य कल्प्यते ॥' इति । तेनाकाशादेरध्यस्तत्वेन, अहं प्रत्यगभिन्नः परमात्मा, अद्वयः अद्वितीय इत्यर्थः । ततश्च ब्रह्मणो वस्तुपरिच्छेदाभावेन त्रिविधपरिच्छेदशून्यत्वं सिद्धमित्यर्थः । तदुक्तं विद्यारण्यगुरुभिः पञ्चकोशविवेके— 'देशकालान्यवस्तूनां कल्पितत्वाच्च मायया । न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं स्फुटं ततः ॥' इति ॥ ७ ॥

ननु 'स्थूलोऽहम्, कृशोऽहम', 'काणोऽहम्', 'बधिरोऽहम्', 'मूकोऽहम्', 'बुभुक्षितोऽहम, पिपासितोऽहम्', 'मन्ताहम्', 'निश्चितोऽहम्' इति देहादिरूपेणानुभूयमानस्य प्रतीचः कथं चिदेकरसब्रह्मतेत्याशङ्क्य देहादीनामनात्मत्वं प्रत्येकं साधयति—

न देहो नेन्द्रियं चाहं
न प्राणो न मनो न धीः ।
ममतापरिरब्धत्वा-
दाक्रीडत्वादिदंधियः ॥ ८ ॥

देहः सशिरस्कः पिण्डः । इन्द्रियं द्विविधं ज्ञानसाधनं चक्षुरादि कर्मसाधनं पाण्यादि च । प्राणः पञ्चवृत्तिः । मनः संशयात्मकम् । धीर्बुद्धिर्निश्चयात्मिका । अहंशब्दस्य देहादिभिः प्रत्येकं संबन्धः । एते देहादयो बुद्धिपर्यन्ताः पञ्चापि पदार्था अनात्मान इत्यर्थः । कुत इत्यत आह—ममतेत्यादिना । ममतापरिरब्धत्वात्, ममतया ममेति बुद्ध्या परिरब्धत्वादालिङ्गितत्वात्, विषयीकृतत्वादिति यावत् । इदंधियः इदंबुद्धेः, आक्रीडत्वाल्लीलास्थानत्वात्, इदंबुद्धिविषयत्वादित्यर्थः । अत्रेदमनुमानं विवक्षितम्—'देहादयः प्रत्येकमनात्मानो ममताबुद्धिविषयत्वादिदंबुद्धिविषयत्वाच्च घटादिवत्' इति। 'देहोऽनात्मा रूपादिमत्त्वाद्घटवत्'; 'इन्द्रियाण्यनात्मानः करणत्वात्कुठारवत्'; 'प्राणोऽनात्मा वायुत्वाद्बाह्यवायुवत्'; 'देहोऽहम्' इत्यादिप्रतीत्यभावाच्चानात्मत्वं पञ्चानाम्; 'कृशोऽहम्' इत्यादिप्रतीतिस्तु 'रक्तः स्फटिकः' इत्यादिप्रतीतिवदात्मनि देहादिधर्माध्यासादप्युपपद्यते; नापि तत्संघातस्याप्यात्मत्वम्; अनात्मसमुदायस्तत्संघातोऽपि नात्मा, अनात्मत्वात्, गृहादिवदिति भावः ॥ ८ ॥

नन्वहंकारस्यात्मत्वमस्तु तस्य ममेदंबुद्धिविषयत्वाभावादित्याशङ्क्य, सुषुप्त्यादावात्मनि विद्यमानेऽप्यहंकाराभावान्न तयोरैक्यमित्यभिप्रेत्य प्रकारान्तरेण तयोर्भेदं साधयति—

साक्षी सर्वान्वितः प्रेया-
नहं नाहं कदाचन ।
परिणामपरिच्छेद-
परितापैरुपप्लवात् ॥ ९ ॥

साक्षी चिद्रूपोऽन्तःकरणपरिणामरागद्वेषादिद्रष्टा, सर्वान्वितः सर्वत्र घटपटादिष्वन्वितः 'घटः स्फुरति' 'पटः स्फुरति' इति स्फुरणस्य सर्वत्रानुगतत्वेनानुभवात्, प्रेयान्प्रियतम आनन्दरूपः, तस्यैव प्रेयस्त्वात्, अनुभूयते ह्यात्मनः प्रियतमत्वम् 'अहं सर्वदा भूयासं न कदाचिन्मा भूवम्' इत्यात्मनि सर्वेषां प्रार्थनादर्शनादित्यर्थः । एवंभूतोऽहं प्रत्यगात्मा कदाचन कदाचिदपि नाहम्, नाहंकारो भवामीत्यर्थः । तत्र हेतुमाह—परिणामेत्यादिना । अहंकारस्य परिणामपरिच्छेदपरितापैः, परिणामो रागद्वेषादिपरिणामः, परिच्छेदः परिमितत्वम्, परितापो दुःखादिः, एतैस्त्रिभिरुपप्लवः संबन्धस्तस्मादित्यर्थः । द्रष्टृदृश्यभावेन सर्वगतत्वपरिच्छिन्नत्वाद्याकारेणानन्दरूपित्वदुःखित्वाकारेण चानुभूयमानत्वादहंकारात्मनोर्भेदः स्फुट इत्यर्थः । किमिति तर्हि तयोर्भेदः सर्वैर्नानुभूयत इति चेत्, अहंकारात्मनोस्तप्ताय:पिण्डवदविवेकेन दृढमेकतयाध्यसनान्नानुभूयत इति गृहाणेत्यभिप्रायः ॥ ९ ॥

नन्वेवमपि संसारिण आत्मनः कथं नित्यमुक्तब्रह्मता ? न च संसारोऽहंकारस्यैव नात्मन इति वाच्यम् , आत्माहं-कारोभयसंनिधाने प्रतीयमानस्य संसारस्याहंकारैकसंबन्धित्वे मानाभावात् , इत्याशङ्क्यान्वयव्यतिरेकावेव तत्र मान-मित्याह—

**सुप्तेऽहमि न दृश्यन्ते**
**दुःखदोषप्रवृत्तयः ।**
**अतस्तस्यैव संसारो**
**न मे संसर्तृसाक्षिणः ॥ १० ॥**

अहम्यहंकारे सुप्त उपरते सति सुषुप्तिमूर्च्छयोः, दुःखदोषप्रवृत्तयः, दुःखं च दोषा रागादयश्च तत्कार्यभूता प्रवृत्तिश्च दुःखदोषप्रवृत्तयः, ता न दृश्यन्ते यतः, अतस्त-स्यैवाहंकारस्य संसारः, संसर्तृसाक्षिणः संसर्तुरहंकारस्य साक्षिणो मे मम प्रत्यगात्मनो न संसार इत्यर्थः । अहंकारे सति, जाग्रत्स्वप्नयोः संसारदर्शनात्तदभावे च सुषुप्त्यादौ केवल आत्मनि संसारादर्शनादहंकारसंबन्ध्येव संसार आत्म-न्यपि तदविवेकात्प्रतीयते, यथा दाहकत्वमग्निसंबन्ध्येव सत्त-दविवेकादयस्यपि प्रतीयते यथा वा रक्तिमा जपाकुसुमसं-बन्ध्येव सन्नविवेकात्स्फटिके प्रतीयते तद्वदात्मन्यप्यहंकारो-

पाधिवशादेव संसारः प्रतीयते न स्वतः, सुषुप्त्यादावदर्शनात् । तदुक्तं सर्वज्ञात्ममुनिभिः— 'कर्त्रादिसंनिधिबलेन तथापि कर्तृभोक्तृप्रमातृवपुरापतति भ्रमेण । तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि शुद्धेऽपि पश्यति तमःपटलावृताक्षः ॥' इति । अत आत्मा नित्यमुक्तं ब्रह्मैवेत्यभिप्रायः ॥ १० ॥

नन्वेवमप्यात्मनो जाग्रदाद्यवस्थावत्त्वं वक्तव्यम्, अहंकारस्य सुषुप्तावभावेन सुषुप्त्यवस्थावत्त्वानुपपत्तौ जाग्रत्स्वप्नावस्थाद्वयसंबन्धित्वस्याप्यनुपपत्तेस्तासां तिसृणामप्येकाश्रयत्वनियमादित्याशङ्क्य, अहंकारस्य सुषुप्तौ संस्काररूपेण वर्तमानत्वात्तस्यैव सुषुप्तिर्नात्मनः, तस्य सुषुप्तिसाक्षित्वात्; ततो जाग्रत्स्वप्नावप्यहंकारस्यैवेत्यभिप्रेत्याह—

> सुप्तः सुप्तिं न जानाति
> नासुप्ते स्वप्नजागरौ ।
> जाग्रत्स्वप्नसुषुप्तीनां
> साक्ष्यतोऽहमतद्दृशः ॥ ११ ॥

यः सुप्तः सुप्तिं न जानाति न वेत्ति सोऽहंकार एव सुप्तः सुषुप्त्यवस्थावान्, नैवात्मा । कुतः ? सुषुप्तितात्कालिकाज्ञानसाक्षितया जागरूकत्वादित्यर्थः । ततश्चासुप्ते सुषुप्त्यवस्थारहिते प्रत्यगात्मनि स्वप्नजागरौ न भवतः, तयोः सु-

सुप्त्यवस्थासमानाश्रयत्वादित्यर्थः । हेत्वन्तरमप्याह— जाग्रदित्यादिना । यतो जाग्रत्स्वप्नसुषुप्तीनां साक्षी द्रष्टा, अतोऽहमात्मा, अतद्दशः, ता जाग्रदाद्या दशा अवस्था यस्य स तद्दशः, तद्दशो न भवतीत्यतद्दशः, जाग्रदाद्यवस्थारहित इत्यर्थः । अत्रेदमनुमानं विवक्षितम्— 'आत्मा जाग्रदाद्यवस्थावान्न भवति जाग्रदाद्यवस्थासाक्षित्वात्, यो यत्साक्षी न स तद्धर्मवानन्यथा घटसाक्षी न घटधर्मवान्' इति। तदुक्तमन्वर्थनामसर्वज्ञात्ममुनिभिः— 'तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता दूरे चकासति मतेर्बहिरेव तावत् । आविस्तिरोभवनधर्मतया ह्यवस्थाः कः संकरो विमलचिद्वपुषस्तवाभिः ॥' इति ॥ ११ ॥

जाग्रदाद्यवस्थालक्षणपर्यालोचनयापि नात्मनोऽवस्थासंबन्ध इत्याह—

**विज्ञानविरतिः सुप्ति-**
**स्तज्जन्म स्वप्नजागरौ ।**
**तत्साक्षिणः कथं मे स्यु-**
**र्नित्यज्ञानस्य ते त्रयः ॥ १२ ॥**

विज्ञानविरतिर्विज्ञानस्य विशेषज्ञानस्य विरतिरुपरतिः सुप्तिरित्युच्यते; तज्जन्म तस्य विशेषज्ञानस्य जन्मोत्पत्तिः

स्वप्नजागरावित्युच्येते; तत्रापि वासनामयप्रपञ्चविज्ञानं स्वप्नः, स्थूलप्रपञ्चविज्ञानं जाग्रदिति विभाग इत्यर्थः । ततः किम्? तत्राह—तत्साक्षिण इत्यादिना । नित्यज्ञानस्यालुप्तचिद्रूपस्य तत्साक्षिण उक्तलक्षणसुषुप्त्यादिसाक्षिणो मे ममात्मनस्ते त्रयः सुषुप्तिस्वप्नजागराः कथं स्युः? न कथंचिदित्यर्थः । अयं भावः—सुषुप्त्यवस्थायां तावत्सुषुप्तितात्कालिकाज्ञानावभासकं किंचिच्चैतन्यमङ्गीकार्यं सर्वैरपि, अन्यथोत्थितस्य पुरुषस्य 'सुखमहमस्वाप्सं न किंचिदवेदिषम्' इति सुषुप्तितात्कालिकाज्ञानपरामर्शानुपपत्तेः । तच्चैतन्यं न जन्यम्, मनश्चक्षुरादेः सुप्त्यन्तःपातित्वात् । अनन्तं च, तदजन्यभावस्य नित्यत्वनियमात् । तच्चैतन्यमस्माभिरात्मेत्युच्यते । तथा च कथमनादिनित्यज्ञानस्वरूपस्यात्मनो ज्ञानोपरमरूपा सुषुप्तिर्ज्ञानोत्पत्तिरूपौ स्वप्नजागरौ च स्युः? अहंकारस्य तु जन्यवृत्तिरूपज्ञानाश्रयत्वात्तत्त्रयमुपपद्यते । ततश्चात्मा जाग्रदाद्यवस्थारहित इति ॥

इदानीमात्मनो निर्विकारब्रह्माभेदाय षड्भावविकाररा-हित्यं साधयति—

**षड्विकारवतां वेत्ता**
**निर्विकारोऽहमन्यथा ।**

तद्विकारानुसंधानं
सर्वथा नावकल्पते ॥ १३ ॥

षड्विकारवतां षड्भावविकारवताम् , षट् च ते भावविकाराः 'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति' इत्युक्ताः, ते येषां सन्ति ते षड्विकारवन्तः तेषां बाह्यघटादीनामान्तरबुद्ध्यादीनां च वेत्ता ज्ञाताहमात्मा निर्विकारो विकाररहितो भवामि । आत्मा हि बाह्यान्तरवस्तूनामुत्पत्त्यादिविकाराञ्जानाति, अतो निर्विकारो भवितुमर्हति, 'यो यज्जानाति न स तद्धर्मवान्' इति व्याप्तेर्लोकसिद्धत्वादित्यर्थः । तदुक्तं वार्तिककृता— 'नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः । धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः ॥' इति । विपक्षे दोषमाह— अन्यथेत्यादिना । अन्यथा विकारसाक्षिणोऽपि विकारित्वे, तद्विकारानुसंधानं तेषां विकारिवस्तूनां ये विकारास्तेषामनुसंधानं सर्वथा सर्वप्रकारेणापि नावकल्पते, न संभवतीत्यर्थः । अयमभिसंधिः—आत्मनोऽपि विकारित्वे किमात्मन इतरेषां च विकारा आत्मना ज्ञायन्ते, उतेतरैः ? नोभयथापि, विकारिवस्तुनो मृदादिवज्जडत्वानियमादिति ॥

किं च विकारिवस्तुनो विकाराणां च किं भेद उताभेदः ? नाद्यः, भिन्नयोर्गवाश्वयोरिव विकारविकारिभावानुपपत्तेरि-

त्यभिप्रेत्य द्वितीयपक्षे दूषणमाह—

**तेन तेन हि रूपेण**
**जायते लीयते मुहुः ।**
**विकारि वस्तु तस्यैषा-**
**मनुसंधातृता कुतः ॥ १४ ॥**

तेन तेन रूपेणोत्पत्त्यादिविकाररूपेण तदभिन्नं विकारि वस्त्वपि जायत उत्पद्यते मुहुः शश्वल्लीयते नश्यति च, तयोरभेदादित्यर्थः । हि यस्मादेवं तस्मात्तस्य विकारिवस्तुन एषां विकाराणामनुसंधातृता कुतः, अनुसंधानं कुतः? न कुतोऽपि भवेदित्यर्थः । तत्तद्विकाररूपेण तदा तदा नश्यतो विकारिवस्तुनः कथं कालान्तरीयं विकारानुसंधानं घटते? न कथंचिदित्यर्थः ॥ १४ ॥

नन्वात्मा स्वयं विकारी सन्नप्यात्मन इतरेषां च विकारान्विजानातु; न च तस्य विकारित्वाविशेषे कथं स्वेतरपरिज्ञानमिति वाच्यम्, शिलात्वाविशेषेऽपि रत्नस्य स्वभावविशेषेण स्वेतरावभासकत्ववदात्मनोऽपि स्वभावविशेषेण स्वेतरविकारानुसंधानोपपत्तेः; न च तेन तेन विकारेण साकं नष्टस्य कथं सर्वविकारानुसंधानमिति वाच्यम्, तस्य विकारिण आत्मनो विकारैरत्यन्ताभेदस्यानङ्गीकारात्किं

स्वीषद्भेदघटिताभेदस्य तादात्म्यस्यैव तन्तुपटयोरिवाङ्गीकारादित्याशङ्क्य, एवमप्यात्मन आद्यन्तविकारद्वयानुसंधानं न संभवतीत्याह—

**न च स्वजन्म नाशं वा**
**द्रष्टुमर्हति कश्चन ।**
**तौ हि प्रागुत्तराभाव-**
**चरमप्रथमक्षणौ ॥ १५ ॥**

कश्चन कश्चिन्निपुणोऽपि स्वजन्म स्वोत्पत्तिं नाशं ध्वंसं वा द्रष्टुं ज्ञातुं नार्हति, न शक्नोतीत्यर्थः । तत्र हेतुमाह— तौ हीत्यादिना । हि यस्मात्तौ जन्मनाशौ प्रागुत्तराभावचरमप्रथमक्षणौ, प्रागुत्तरौ यावभावौ प्रागभावप्रध्वंसाभावौ, तयोर्यौ चरमप्रथमक्षणौ तौ प्रागुत्तराभावचरमप्रथमक्षणौ, प्रागभावचरमक्षणं उत्पत्तिर्वस्तुनः प्रध्वंसाभावप्रथमक्षणो नाश इत्यर्थः । यस्माज्जन्मनाशौ प्रागुत्तराभावचरमप्रथमक्षणौ तस्मात्स्वजन्म नाशं वा द्रष्टुं नार्हतीति संबन्धः । इदमत्राकूतम्— आत्मा हि स्वसमानकालिकवस्त्वेव जानातीति वक्तव्यम्, दीप इव स्वसमानकालिकपदार्थावभासकः । तथा च स्वावस्थानसमयेऽविद्यमानयोः प्रागभावप्रध्वंसाभावयोः परिज्ञानाभावे कथं प्रागभावचरमक्षणरूपं

स्वजन्म प्रध्वंसाभावप्रथमक्षणरूपं नाशं च जानीयात्? न कथंचिदपीत्यर्थः। तयोश्चासिद्धौ मध्यवर्तिविकाराणाम- प्यसिद्धिरेव, तेषामपि विकाराणामुत्पत्तिनाशसमानाश्रयत्व- नियमात्। तदुक्तं वाक्यवृत्तौ भाष्यकारैः—'देहेन्द्रियमनः- प्राणाहंकृतिभ्यो विलक्षणः। प्रोज्झिताशेषषड्भावविकारस्त्वं- पदाभिधः॥' इति। ततश्चात्मा निर्विकारत्वाद्ब्रह्मैवेत्यर्थः॥

ननु पूर्वोक्तं सर्वं वृथा, आत्मन उक्तस्वरूपब्रह्मत्वज्ञाने प्रयोजनाभावात्; न च संसारनिवृत्तिरात्मनो ब्रह्मत्वज्ञाने प्रयोजनमिति वाच्यम्, तन्निवृत्तेरसंभवात्; संसारो ह्यात्म- न्यहंकारोपाधिना प्रतीयमानः कर्तृत्वादिः; स च न ज्ञानेन निवर्तयितुं शक्यः, तस्यात्मनि सोपाधिकभ्रमत्वात्, सोपा- धिकभ्रमस्य च यावदुपाध्यवस्थानं तत्त्वज्ञानेऽप्यवस्थानात्, लोके सोपाधिकभ्रमस्य प्रतिबिम्बचलनादेर्यावदुपाधिचलनं प्रतीतेः; न चोपाधेरहंकारस्य ब्रह्मज्ञानेन निवृत्तौ तत्प्रयु- क्तस्यात्मनि प्रतीयमानस्य कर्तृत्वादेरपि निवृत्तिरिति वाच्यम्, तस्य मूलाज्ञाने सति निवृत्तेरसंभवात्; न च मूलाज्ञानस्याप्यात्मनि विद्यमानस्य ब्रह्मज्ञानान्निवृत्तिरिति वाच्यम्, तस्य कल्पकाभावेनाकल्पिततया ज्ञानेन निवर्तयि- तुमशक्यत्वादन्यथाज्ञानस्यानवस्थानप्रसङ्गादित्याशङ्क्य, अ-

ज्ञानस्य ज्ञाननिवर्त्यत्वसिद्धये कल्पितत्वं वक्तुं तस्यात्मनि वस्तुतोऽसंभवमाह—

न प्रकाशोऽहमित्युक्ति
र्यत्प्रकाशनिबन्धना
स्वप्रकाशं तमात्मान-
मप्रकाशः कथं स्पृशेत् ॥ १६ ॥

अहं न प्रकाशे न भामीत्युक्तिर्वचनं यत्प्रकाशनिबन्धना, यस्य प्रकाशो यत्प्रकाशः स्वरूपप्रकाश एव निबन्धनं निमित्तं यस्याः सा तथोक्ता, 'न प्रकाशे' इति व्यवहारस्य प्रकाशैकनिबन्धनत्वात्, स्वप्रकाशानुभवनिमित्तत्वादित्यर्थः । तं स्वप्रकाशं स्वयमेव भासमानमात्मानमप्रकाशोऽज्ञानं कथं स्पृशेदावृणुयात्? न कथंचिदित्यर्थः । अयं भावः— आत्मा सर्वदा स्वयं भासमानः सर्वं भासयति; स कथमज्ञानेन प्रकाशविरोधिना स्पृश्येत? न हि खरतरकिरणशाली दिनकरस्तमसा स्पृश्यमानो दृश्यते; तत्कस्य हेतोः? प्रकाशाप्रकाशयोर्विरोधात्; तथा चाज्ञानस्यात्मनि युक्त्यसहत्वान्न परमार्थतः संभव इति ॥ १६ ॥

ननु कथं तर्हि 'न प्रकाशे' इत्यात्मन्यज्ञानानुभव इत्याशङ्क्य सूर्ये पेचकादीनामन्धकारप्रतीतिवद्भ्रान्त्याप्युपप-

यत इत्याह—

तथाप्याभाति कोऽप्येष
विचाराभावजीवनः ।
अवश्यायश्चिदाकाशे
विचारार्कोदयावधिः ॥ १७ ॥

यद्यपि वस्तुत आत्मन्यज्ञानं न संभवति, तथाप्येषोऽप्रकाशः, अवश्यायो नीहारः, अवश्यायवदवश्याय आवरकत्वात्, चिदाकाशे चित्प्रकाश आत्मन्याभातीति संबन्धः। नन्वज्ञानस्य वस्तुतोऽसत्त्वे कथं प्रत्यक्षप्रतीतिः? न ह्यसतः शशविषाणादेः प्रत्यक्षप्रतीतिरस्ति, तत्राह—कोऽपीति। कोऽपि सत्त्वासत्त्वाभ्यामनिर्वचनीयः। अप्रकाशस्यासद्विलक्षणत्वाङ्गीकारान्न प्रत्यक्षप्रतीत्यनुपपत्तिरित्यर्थः। नन्वेवमप्यप्रकाशस्यात्मन्यनुभवो नोपपद्यते विरोधादिति चेत्; न, तथा हि— किं जडत्वस्वप्रकाशविरोधि, उत स्वप्रकाशरूप आत्मा? नाद्यः, जडाप्रकाशयोः परस्परविरोधासंभवात्; नापि द्वितीयः, तस्य विरोधिनि स्वप्रकाश आत्मन्यवस्थानानुपपत्तेः; न च 'अहं न प्रकाशे' इत्यज्ञानसाधकस्य तस्य नाज्ञानविरोधित्वमिति वाच्यम्, आत्मस्वरूपस्य प्रकाशस्याविरोधित्वेऽन्यस्यापि विरोधिनोऽभा-

त्वात्कदापि निवृत्तिर्न स्यात्, तत्राह—विचारार्कोदयावधि-रिति । विचारो विचारजन्यं ज्ञानमेवार्कः सूर्यस्तमोनिवर्तकत्वात्, तस्योदय उत्पत्तिः, सोऽवधिः स्थितिमर्यादा यस्याप्रकाशस्य स विचारार्कोदयावधिरित्यर्थः । केवलात्मनोऽविरोधित्वेऽप्यखण्डाकारवृत्त्यारूढात्मचैतन्यस्य तन्निवर्तकत्वोपपत्तिः, केवलसूर्यकिरणस्यादग्धृत्वेन तृणादिभासकत्वेऽपि सूर्यकान्तसंयुक्तस्य तस्य दग्धृत्वदर्शनादिति भावः । किमिति तर्हि वाक्यजन्याखण्डाकारवृत्तौ सत्यामपि सर्वेषामात्माज्ञानं न निवर्तत इत्याशङ्क्याह— विचाराभावजीवन इति । विचाराभाव एव श्रवणमननरूपयोर्वेदान्तप्रमाणतत्प्रमेयब्रह्मविषययोर्विचारयोरभाव एव जीवनमवस्थितिहेतुर्यस्याप्रकाशस्य स विचाराभावजीवन इत्यर्थः । वाक्यजन्याप्यखण्डाकारवृत्तिरसंभावनादिभिः प्रतिबद्धा सती नाज्ञानं निवर्तयति, यथा मणिमन्त्रादिभिः प्रतिबद्धोऽग्निः संयुक्तमपि तृणादिकं न दहति तद्वत् । तदुक्तं सर्वज्ञात्ममुनिभिः—'पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयापि यथा । न फलाय दृष्टविषया भवति श्रुतिसंभवापि तु तथात्मनि धीः ॥' इति । यदा तु सम्यग्विचारेणासंभावनादयो निवर्तन्ते तदाप्रतिबद्धा सत्यज्ञानं निवर्तयति, यथा मण्यादिप्रतिबन्धनिवृत्तावग्निस्तृणादिकं दहति तद्वत् ।

एतदपि तैरेवोक्तम्— 'पुरुषापराधविगमे तु पुनः प्रतिबन्धकव्युदसनात्सफला । मणिमन्त्रयोरपगमे तु यथा सति पावकाद्भवति धूमलता ॥' इति । तथा चाज्ञानस्यानिर्वचनीयस्य कल्पितत्वेन ज्ञानान्निवृत्त्युपपत्तिः । न च तस्य कल्पकाभावोऽज्ञानस्य, लोके दीपवद्भाट्टपक्षे स्फुरणवद्गुरुमते संवेदनवद्गुरुबौद्धव्यतिरिक्तमते भेदवच्च स्वपरनिर्वाहकत्वात् । नाप्यनवस्था, अज्ञानान्तरस्यानङ्गीकारात् । तथा चाज्ञानस्य ज्ञानान्निवृत्तौ मूलोच्छेदेनाहंकारस्य निवृत्तिसंभवादात्मनि प्रतीयमानस्याहंकारोपाधिप्रयुक्तस्य कर्तृत्वादिरूपसंसारस्यापि निवृत्तिर्भवतीति प्रत्यगात्मनो ब्रह्मत्वज्ञानं सफलमिति भावः ॥ १७ ॥

ननु ब्रह्मव्यतिरिक्तस्य सर्वस्याज्ञानकल्पिततया परमार्थतोऽसत्त्वे कर्मकाण्डाद्यप्रामाण्यं स्यात्; स हि स्वर्गकामादेर्यागादिकर्तव्यतां बोधयति; तच्च बोधनं नियोगस्यापूर्वस्य नियोज्यस्य पुरुषस्य नियोगविषयस्य यागस्य नियोगफलस्य स्वर्गस्य च परमार्थतोऽसत्त्वेऽनुपपन्नं स्यात्, ब्रह्मव्यतिरिक्तस्य सर्वस्य परमार्थतोऽसत्त्व उपनिषदप्रामाण्यं च स्यात्; तत्रापि हि मोक्षकामस्य 'आत्मा वा अरे द्रष्टव्यः' इत्यादिना श्रवणादिकर्तव्यता बोध्यते ; तस्याप्यप्रामाण्यमयुक्तम् , कर्म-

काण्डोपनिषदेकदेशयोरपि ब्रह्मवाक्येन सह संप्रदायस्य तुल्यत्वादित्याशङ्क्य, किं तत्त्वज्ञानोत्तरकाले कर्मकाण्डाद्यप्रामाण्यमापाद्यते किं वा ततः प्राक्काले? नाद्यः, तदुत्तरकाले तदप्रामाण्यस्य गार्हस्थ्ये ब्रह्मचारिधर्मावेदकश्रुतेरिव संन्यासाश्रमकालेऽग्निहोत्रादिश्रुतेरिव चेष्टत्वादित्यभिप्रेत्य द्वितीयं प्रत्याह—

आत्माज्ञानमहानिद्रा-
जृम्भितेऽस्मिञ्जगन्मये ।
दीर्घस्वप्ने स्फुरन्त्येते
स्वर्गमोक्षादिविभ्रमाः ॥ १८ ॥

आत्माज्ञानमहानिद्राजृम्भिते, आत्माज्ञानं प्रत्यगात्माश्रयविषयमज्ञानम्, तदेव महती निद्रानादिकालमारभ्य प्रवृत्तत्वात्स्वरूपावरणपूर्वकविपरीतहेतुत्वाच्च, ततो जृम्भित उत्पन्ने जगन्मये जगद्रूपेऽस्मिन्ननुभूयमाने दीर्घस्वप्ने तत्त्वज्ञानपर्यन्तमनुवर्तमाने, एते स्वर्गमोक्षादिविभ्रमाः स्वर्गमोक्षावादी येषां विभ्रमाणां ते तथा । स्वर्गशब्दस्तत्कामनियोज्यनियोगतद्विषययागादेरप्युपलक्षणम् । मोक्षशब्दश्च तत्साधनज्ञानश्रवणादिनियोगादेरप्युपलक्षणम् । आदिशब्दो लौकिकव्यवहारानुकूलपुत्रमित्रादिसंग्रहार्थः । मोक्षस्य बन्ध-

सापेक्षत्वाद्बन्धस्य च मिथ्यात्वाद्बन्धसापेक्षमोक्षस्यापि विभ्रमत्वं द्रष्टव्यम् । स्फुरन्ति स्फुरन्तीव, न तु स्फुरन्तीत्यर्थः । अयं भावः— तत्त्वज्ञानात्पूर्वकाले व्यावहारिकसत्यस्य सर्वस्य जगतो नियोज्यनियोगादेः सत्त्वेन प्रबोधात्पूर्वं स्वप्नादाविव सर्वव्यवहारोपपत्तेर्न कर्मकाण्डाद्यप्रामाण्यम् , तस्य व्यावहारिकप्रामाण्यस्य सत्त्वात् । तावता च तस्य चरितार्थत्वेऽतत्पराणामगतिकानां ब्रह्मवाक्यानां परमार्थसत्यविषयाणां नाकस्माद्बाधो युक्तः । तदर्थस्य व्यवहारातीतत्वेन व्यावहारिकप्रामाण्यानुपपत्तौ ब्रह्मवाक्यानां तात्त्विकप्रामाण्यस्याप्यनङ्गीकारे किंचिदपि प्रामाण्यं न स्यात् । प्रकारभेदेनोभयप्रामाण्योपपत्तौ च सर्वात्मना तदप्रामाण्यं न युक्तम् । तदुक्तं सकलवेदार्थज्ञेन ब्रह्मणापि ब्रह्मगीतायाम्— ' सत्यार्थो हि द्विधा प्रोक्तो मया हे स्वर्गवासिनः । एकः स्वभावतः साक्षात्परमार्थः सदैव तु ॥ स शिवः सत्यचैतन्यः सुखानन्त्यस्वलक्षणः । अपरः कल्पितः साक्षाद्ब्रह्मण्यध्यस्तमायया ॥ व्यावहारिकसत्यार्थं साक्षात्सत्यार्थचिद्घनम् । उभयं वक्ति वेदस्तु मार्गा नैवं वदन्ति हि ॥ ' इति । अतोऽद्वितीयब्रह्मण एव परमार्थसत्यत्वेऽपि व्यावहारिकसत्यार्थत्वेनार्थवत्त्वान्न कर्मकाण्डाद्यप्रामाण्यमिति ॥ १८ ॥

नन्वेवमपि जीवस्य भोक्तुस्तद्भोग्यजातस्य च ब्रह्ममात्रत्वेऽनुभूयमानभोक्तृभोग्यविभागो न स्यात्सर्वस्य ब्रह्मण्यध्यस्तत्वाविशेषादित्याशङ्क्य मायावशादेव विभागोऽयमुपपद्यत इत्याह—

**जडाजडविभागोऽय-**
**मजडे मयि कल्पितः ।**
**भित्तिभागे समे चित्र-**
**चराचरविभागवत् ॥ १९ ॥**

जडाजडविभागो जडमिदं भोग्यमजडोऽयं भोक्तेति विभागोऽयं प्रतीयमानोऽजडेऽलुप्तचैतन्यस्वभावे मयि प्रत्यगभिन्ने ब्रह्मणि कल्पितः, माययारोपित इत्यर्थः । स्वप्रकाशेऽप्येकस्मिन्ब्रह्मण्युपाधिप्राधान्याद्भोग्यजडकल्पना, उपाधेरप्राधान्यादजडभोक्तृकल्पनाप्युपपद्यते । तदुक्तं वार्त्तिककारैः— 'तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् । परः कारणतामेति भावनाज्ञानकर्मभिः ॥' इति । अजडे ब्रह्मणि सदृशविसदृशोभयकल्पने दृष्टान्तमाह— भित्तीत्यादिना । भित्तिभागे कुड्यप्रदेशे समे निर्विकारे, अचल इत्यर्थः । चराचरविभागवत्, चरस्य गजादेरचरस्य पर्वतादेश्च विभागो यथा तथेत्यर्थः ॥ १९ ॥

नन्वेवमात्मनो ब्रह्मत्वं न संभवति, तस्य संसारसाक्षितारूपविकल्पयुक्तत्वाद्ब्रह्मणश्च 'अस्थूलमनणु' 'नेति नेति' इत्यादिश्रुत्या निर्विकल्पकतया सिद्धेरित्याशङ्क्याह—

**चेत्योपरागरूपा मे**
**साक्षितापि न तात्त्विकी ।**
**उपलक्षणमेवेयं**
**निस्तरङ्गचिदम्बुधेः ॥ २० ॥**

चेत्योपरागरूपा, चेत्यं कर्तृत्वादिप्रपञ्चः, तेनोपरागः संबन्धः, तद्रूपा साक्षितापि साक्षित्वमपि मे मम प्रत्यगात्मनो न तात्त्विकी न परमार्थभूता चेत्यस्यापरमार्थत्वेन तत्संबन्धिसाक्षिताया अपि परमार्थस्वरूपत्वायोगात् । किं त्वियं साक्षिता निस्तरङ्गचिदम्बुधेः, निस्तरङ्गा परमार्थतो निरस्तास्तरङ्गाः कर्तृत्वादिप्रपञ्चरूपो यस्याः सा चिदेवाम्बुधिः समुद्रो निस्तरङ्गचिदम्बुधिः, तस्य मे मम प्रत्यगात्मन उपलक्षणमेव तटस्था सती ज्ञापिकैव, जगत्कारणत्वमिव ब्रह्मणः । तथा चात्मनो वस्तुतो निर्विकल्पत्वान्न ब्रह्मत्वानुपपत्तिरिति भावः ॥ २० ॥

एवमुक्तेन प्रकारेण ब्रह्माणि जगत आत्मनि चाहंकारादेः कल्पितत्वेन वस्तुतोऽभावात्पदद्वयलक्ष्ये ब्रह्माणि न कश्चिदपि

विकार इत्याह—

> अमृताब्देर्न मे जीर्णि
> मृषाडिण्डीरजन्मभिः ।
> स्फाटिकाद्रेर्न मे रागः
> स्वाभ्रसंध्याभ्रविभ्रमैः ॥ २१ ॥

अमृतो मोक्षरूपः स्वयंप्रकाशाद्वयानन्द एवाब्धिस्तस्य, तत्पदलक्ष्यस्येत्यर्थः । मे मम प्रत्यगभिन्नब्रह्मणो मृषाडिण्डीरजन्मभिः, मृषारूपा मिथ्यारूपा वियदादय एव डिण्डीराः फेनास्तेषां यानि जन्मानि तैर्जन्मभिः । जन्मपदं नाशस्याप्युपलक्षणम् । न जीर्णिर्न ह्रानिर्वृद्धिर्वा । जीर्णिपदं वृद्धेरप्युपलक्षणम् । मिथ्यावस्तुनोऽधिष्ठानादूषकत्वादित्यर्थः । ब्रह्मणि मायया वियदाद्युत्पत्त्या तदधिष्ठानब्रह्मणो न ह्रानिर्न वृद्धिरित्येतद्भारतीतीर्थैरपि कूटस्थदीपे भणितम्— 'मायामेघो जगन्नीरं वर्षत्वेष यथा तथा । चिदाकाशस्य नो ह्रानिर्न वा लाभ इति स्थितिः ॥' इति । त्वंपदलक्ष्यमपि शुद्धमित्याह— स्फाटिकाद्रेरित्यादिना । स्फाटिकाद्रेः स्फाटिकाद्रिवत्स्वच्छस्य मे मम प्रत्यगात्मनस्त्वंपदलक्ष्यस्य, स्वाभ्रसंध्याभ्रविभ्रमैः, स्वाभ्रोऽविद्याकल्पितोऽहंकारादिः, स एव संध्याभ्रं संध्याकालिकमेघः स्वसंनिहिते स्वच्छे स्वधर्मासञ्जकत्वसाम्यात्; तत्कृतैर्वि-

भ्रमैः कर्तृत्वादिभ्रान्तिभिः, मेघविषये विभ्रमाः अनवस्थाननिःसंचाराः ; तैः रागः संबन्धः, मेघविषय आरुण्यम् ; स्फटिकपर्वतस्यारुण्यवदात्मनश्चिद्रूपस्य परमार्थतः कर्तृत्वभोक्तृत्वरागद्वेषादिसंबन्धो नास्तीत्यर्थः । अहंकारादिधर्मैरात्मनोऽसंबन्धोऽपि श्रीभारतीतीर्थैरेवाभाणि चित्रदीपे—"अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा । वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत् ॥" इति । अतः पदद्वयलक्ष्यमपि चैतन्यमतिशुद्धमिति भावः ॥ २१ ॥

नन्वेवमपि पदद्वयलक्ष्ये ब्रह्मण्यस्त्येव विकारः, तस्य परमार्थतः सत्त्वाश्रयत्वस्य वक्तव्यत्वात्, अन्यथा शशविषाणवदसत्त्वप्रसङ्गादित्याशङ्क्याह—

> स्वरूपमेव मे सत्त्वं
> न तु धर्मो नभस्त्ववत् ।
> मदन्यस्य सतोऽभावा-
> न्न हि सा जातिरिष्यते ॥ २२ ॥

मे मम पदद्वयलक्ष्यस्य सत्त्वं स्वरूपमेव, न तु मदाश्रितो धर्मः । यथा सत्त्वस्य सत्त्वान्तराश्रयत्वाभावान्नासत्त्वं तद्वदित्यर्थः । ननु घटे घटत्ववत्सद्रूप आत्मन्यपि धर्मरूपं सत्त्वं किं न स्यादित्याशङ्क्य घटेष्वनेकेषु घटोऽयं घटोऽयमित्यनु-

गतव्यवहारसिद्धये घटत्वजातिरिव सद्व्यक्तिभेदाभावेनात्मनि सत्त्वरूपा जातिर्नाङ्गीकार्येत्याह— सदन्यस्येत्यादिना । सदन्यस्य पदद्वयलक्ष्यरूपात्माभिन्नस्य सतः सद्व्यक्त्यन्तरस्याभावात्सा सत्त्वरूपा जातिर्नेष्यते । एकव्यक्तौ जात्यनङ्गीकारे दृष्टान्तमाह— नभस्त्ववदिति । घटेष्वनेकेष्वनुगतव्यवहारार्थं घटत्वं जातिरङ्गीक्रियते । अत्र तु वियदादेः सर्वस्य मिथ्यात्वेन सदन्तरस्याभावान्नानुगतव्यवहारार्थं घटत्ववज्जातिरूपं सत्त्वमङ्गीक्रियते, किं तु स्वरूपमेव नभस्त्ववत् । ननु 'घटः सन्' 'पटः सन्' 'कुड्यं सत्' इत्यादिप्रतीत्यनुरोधेन घटपटाद्युपाधिभिन्नेषु सत्स्वनुगतव्यवहाराय सत्त्वं जातिरङ्गीक्रियतामिति चेत्; न, उपहितेषु सर्वेष्वनुगतब्रह्मरूपसन्मात्रेणैव घटाद्युपाधिभिन्नेष्वाकाशेष्वनुगतमहाकाशेनेवानुगतव्यवहारोपपत्तेः । तस्मान्न सत्त्वं जातिः । अत एव नोपाधिरपि, अनुगतव्यवहारायैव तस्यापि कल्पितत्वात् । सत्त्वस्य सन्मात्रब्रह्मरूपत्वं वासिष्ठेनाप्युक्तम्— 'विशेषं संपरित्यज्य सन्मात्रं यदलेपकम् । एकरूपं महारूपं सत्तायास्तत्परं विदुः ॥' इति । तथा च सत्त्वस्य स्वरूपत्वेन धर्मत्वाभावादत्यन्तं शुद्धमेव पदद्वयलक्ष्यमिति भावः ॥

नन्वेवमप्यात्मनो ज्ञानाश्रयत्वमङ्गीकर्तव्यम्, अन्यथा घटादिवदनात्मत्वप्रसङ्गात्, ज्ञानाश्रयस्यैवात्मत्वात्, 'अहं

जानामि' इत्यात्मनो ज्ञानाश्रयत्वप्रतीतेश्च; तथा च न 'साक्षी चेता केवलो निर्गुणश्च' इत्यादिश्रुत्या निर्गुणब्रह्मत्वमात्मन इत्यत आह —

**स्वरूपमेव मे ज्ञानं**
**न गुणः स गुणो यदि ।**
**अनात्मत्वमसत्त्वं वा**
**ज्ञेयाज्ञेयत्वयोः पतेत् ॥ २३ ॥**

मे मम ज्ञानं चैतन्यं स्वरूपमेव न तु मदाश्रितो गुणः; कुत इत्यत आह— स गुणो यदीत्यादिना स चैतन्यम् । विधेयापेक्षया पुंलिङ्गनिर्देशः । चैतन्यं गुण इति वदन्वादी प्रष्टव्यः किं तेन चैतन्येनात्मा विषयीक्रियते न वेति । उभयथापि दूषणमाह— अनात्मत्वमिति । ज्ञेयाज्ञेयत्वयोः, आत्मनो वेद्यत्वेऽनात्मत्वं घटादिवत्, अवेद्यत्वे चासत्त्वं वा शशविषाणवदापतेत् भवेदित्यर्थः । यद्यात्मनः स्वसमवेतज्ञानाविषयत्वमुच्यते तदाज्ञायमानत्वेनात्मनोऽसत्त्वं स्यात् । न हि प्रमाणतोऽज्ञायमानं शशविषाणमस्तीति केनचित्प्रतिपद्यते । यद्येतद्दोषपरिजिहीर्षया तस्य ज्ञायमानत्वमुच्येत तदा घटादिवदनात्मत्वमात्मनः स्यात्, ज्ञानविषयस्यानात्मत्वनियमात् । नन्वात्माश्रितज्ञानेनात्माऽऽश्र-

यत्वेन भासते, न विषयत्वेन येन घटादिवदनात्मत्वं स्यादिति चेत्; न, ज्ञानव्यतिरिक्तस्य ज्ञानाधीनप्रकाशस्य ज्ञानविषयत्वनियमेनात्मनोऽपि ज्ञानाधीनप्रकाशस्य विषयताया आवश्यिकत्वेनानात्मत्वदोषतादवस्थ्यात् । न च ज्ञानाश्रयत्वमात्मत्वे प्रयोजकम्, लाघवाज्ज्ञानत्वस्यैव तत्प्रयोजकत्वात्, 'अहं जानामि' इति प्रतीतेश्चाहंकाराश्रयवृत्तिविषयत्वात् । न च 'ज्ञानं नष्टम्' 'ज्ञानमुत्पन्नम' इति प्रतीत्या तस्य जन्मादिमत आत्मत्वमनुपपन्नमिति वाच्यम्, तस्या अपि वृत्तिविषयकत्वात् । तस्मादात्मनो न ज्ञानं गुणः, किंतु स्वरूपमेव । बादरायणोऽपि 'ज्ञोऽत एव' इत्यात्मनो ज्ञानरूपत्वं सूत्रयांबभूव । सूत्रार्थो विद्यारण्यगुरुभिरधिकरणरत्नमालयां दर्शितः— 'अचिद्रूपोऽथ चिद्रूपो जीवोऽचिद्रूप इष्यते । चिदभावात्सुषुप्त्यादौ जाग्रज्जन्मनसा कृता ॥' इति पूर्वपक्षे प्राप्ते, सिद्धान्तमाह— 'ब्रह्मत्वादेव चिद्रूपश्चित्सुषुप्तौ न लुप्यते । द्वैतादृष्टिर्द्वैतलोपान्न हि द्रष्टुरिति श्रुतेः ॥' इति । ननु ज्ञानरूप आत्मा स्वात्मानं जानाति न वा? जानाति चेद्युगपत्कर्मकर्तृत्वप्रसङ्गः, न चेज्जानाति तस्याभास्यत्वप्रसङ्ग इति चेत्; न, तस्य स्वप्रकाशत्वेन ज्ञानान्तरमनपेक्ष्यैव भासमानत्वात् । नापि तस्य कर्मकर्तृत्वम्, स्वविषयत्वानङ्गीकारात् । तदुक्तं विद्यार-

ण्यगुरुभिः पञ्चकोशविवेके— 'स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यते । ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया ॥' इति । यत्प्रसादाद्धि सर्वं जगद्भासते स कथं नास्ति न प्रकाशते वा ? आत्मनः सर्वावभासकत्वं स्वस्यान्यानपेक्षया भासमानत्वं चात्मयोगविंशेऽप्युक्तम्— 'अज्ञानतत्कार्यतदीयभेदानव्यक्षयन्ती निजसत्तयैव । स्मर्तुं च विस्मर्तुमहो न शक्या सुप्त्यादिषु स्वप्रभयास्मि सा चित् ॥' इति । तस्मादात्मा ज्ञानरूपो न ज्ञानगुणक इति स निर्गुणं ब्रह्म भवेदिति भावः ॥ २३ ॥

एवमात्मन आनन्दोऽपि न गुणः किं तु स्वरूपमेवेति साधयति—

**अहमेव सुखं नान्य-**
**दन्यच्चेन्नैव तत्सुखम् ।**
**अमदर्थं न हि प्रेयो**
**मदर्थं न स्वतः प्रियम् ॥ २४ ॥**

अहमात्मा सुखमेव सुखस्वरूप एव न तु सुखगुणकः । यदि सुखमात्मनोऽन्यद्गुणः स्यात्, तत्सुखत्वेनाभिमतं नैव सुखं स्यात् । कुत इति चेत्, किं तदनात्मभूतसुखमनात्मशेषः, उत तच्छेषो वा ? नाद्य इत्याह— अमदर्थमिति ।

चेदित्यनुषङ्गः । अमदर्थमात्मशेषो न चेत्तर्हि न तत्प्रेयः प्रीतिविषयो न भवेत्, अनात्मशेषसर्पादौ प्रीतिविषयत्वादर्शनात् । न द्वितीय इत्याह— मदर्थमिति । अत्रापि चेदित्यनुषज्यते । मदर्थमात्मशेषश्चेत्स्वतः प्रियं न स्यात्, आत्मशेषस्य पुत्रभार्यादेः स्वतः प्रीतिविषयत्वादर्शनादित्यर्थः । सुखं हि सर्वेषां प्रियं भवति; तच्च स्वत एव प्रियं न परोपाधिना; अत आत्मैव भवितुमर्हति । कथमिति चेच्छृणु । जगति सर्वेषां पदार्थानां चतुर्धावस्थितिः— आत्मा प्रियोऽप्रिय उपेक्ष्यश्चेति । सुखं तावन्न व्याघ्रादिवदप्रियम्, तस्य सर्वैः प्रार्थ्यमानत्वात्; अत एव न लोष्टादिवदुपेक्ष्यम्; नापि प्रियमात्रम्, तच्छेषे पुत्रभार्यादावपि तद्दर्शनात्; अतः परिशेषादात्मैव । नन्वात्मशेषत्वेन तस्य प्रीतिविषयत्वं किं न स्यादिति चेत्; तर्हि वक्तव्यमात्मनि प्रीतिः किंनिमित्तेति, येन सुखमपि तच्छेषतया प्रियं जायते । सुखसाधनत्वादिति चेत्; तर्हि सुखसाधनेनात्मनोपकार्यः कश्चिद्वक्तव्यः, स्रक्चन्दनादिसुखसाधनेनान्यस्यैवोपकार्यत्वदर्शनात्, आत्मनि च कर्मकर्तृविरोधात्, स चोपकार्योऽन्यो न दृश्यते । तस्मान्न सुखसाधनतयात्मा प्रियः, किं तु सुखस्वरूपतया तस्मान्नात्मशेषतया सुखस्यापि प्रियत्वम्, किं त्वात्मतयैव । ननु 'सुखमुत्पन्नम्,

नष्टम्' इति प्रतीयमानस्य कथमात्मत्वमिति चेत्; न, तस्य तद्रूपग्राहकवृत्तिविषयत्वात्। सर्वमेतदुक्तं ब्रह्मानन्दे— 'आत्मा शेष उपेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि। आत्मा प्रेयान्प्रियः शेषो द्वेषोपेक्षे तदन्ययोः॥ इति व्यवस्थितो लोको याज्ञवल्क्यमतं च तत्। सुखसाधनतोपाधेरन्नपानादयः प्रियाः॥ आत्मानुकूल्यात्स्त्र्यादिसमश्चेदमुनात्र कः अनुकूलयितव्यः स्यादेकस्मिन्कर्मकर्तृता॥' इत्यादि। आत्मनः सुखरूपत्वं सर्वज्ञात्ममुनिभिरप्युक्तम्— 'सर्वं यदर्थमिह वस्तु यदस्ति किंचित्पारार्थ्यमुज्झति च यन्निजसत्तयैव। तद्वर्णयन्ति हि सुखं सुखलक्षणज्ञास्तत्प्रत्यगात्मनि समं सुखता च तस्मात्॥' इति। ब्रह्मगीतासु च— 'प्रत्यग्रूपः शिवः साक्षात्परमानन्दलक्षणः। परप्रेमास्पदत्वेन प्रतीतत्वात्सुरर्षभाः सर्वस्यैव तु कामाय न सर्वं भवति प्रियम् किं त्वात्मनस्तु कामाय ततः प्रियतमः स्वयम्। अतो देवाः प्रियतमो ह्यात्मा न सुखलक्षणः॥' इत्यादि तस्माद्युक्त्या विद्वदनुभूत्या बहुविदां वचनैश्चात्मा सुखरूप इत्यत्र न कश्चिद्विवाद इति भावः॥ २४॥

नन्वेवमपि ब्रह्मणः 'एकधैवानुद्रष्टव्यम्' इति श्रुत्युक्तमखण्डैकरसत्वं न संभवति, उक्तप्रकारेण तस्य सच्चिदानन्द-

रूपत्रयात्मकत्वात्; न च सच्चिदानन्दानां तेषां त्रयाणा-मप्यत्यन्ताभेद इति वाच्यम्, तथात्वे तद्वाचकानां सच्चि-दानन्दशब्दानां त्रयाणामपि पर्यायतया सहप्रयोगानुपपत्तेः; न हि घटकुम्भकलशादिशब्दानामेकार्थवाचकानां सहप्रयो-गोऽस्तीत्याशङ्क्य ब्रह्मणोऽखण्डैकरसत्वमुपपादयति—

**न हि नानास्वरूपं स्या-**
**देकं वस्तु कदाचन ।**
**तस्मादखण्ड एवास्मि**
**विजहज्जागतीं भिदाम् ॥ २८ ॥**

एकमद्वितीयं सच्चिदानन्दात्मकं वस्तु ब्रह्म कदाचन कदाचिदप्युपाधिकाले तदभावकालेऽपि नानास्वरूपं नाना-रसं न स्यान्न भवेदित्यर्थः । तत्र हेत्वभिप्रायेण वस्त्विति विशेषणम् । यतो वस्तु परमार्थभूतं तत इत्यर्थः । वस्तुग्रहणं ज्ञानानन्दयोरप्युपलक्षणम् । अयमर्थः— ब्रह्मणि सत्यज्ञा-नानन्दानां परस्परभिन्नत्वे सत्यस्य सत्यत्वं ज्ञानस्य ज्ञानत्व-मानन्दस्यानन्दत्वं च न सिध्येत्; कथमिति चेत्, सत्यं यदि ज्ञानाद्भिन्नं स्याज्जडस्य तस्य शुक्तिरूप्यादेरिव सत्यत्वं न स्यात्, एवं यदि ज्ञानमपि सत्याद्भिन्नं स्यादसत्यस्य तस्य ज्ञानस्य जडत्वनिगमेन ज्ञानत्वं न स्यात्, ततः सत्यज्ञान-

योः सत्यत्वज्ञानत्वासिद्धयेऽत्यन्तं परस्पराभेदोऽङ्गीकर्तव्यः । तदुक्तं सर्वज्ञात्ममुनिभिः— 'सत्येऽप्यस्ति ज्ञानता ज्ञानतायां सत्यत्वं च स्पष्टमस्त्येव तद्वत् । सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः ॥' इति । एवं यदि ज्ञानादानन्दोऽपि भिन्नः स्याज्ज्ञानभिन्नस्य तस्य घटादिवदनानन्दत्वमेव स्यात्, तथानन्दादपि यदि ज्ञानं भिन्नं स्यादानन्दाभिन्नस्य तस्य घटादिवज्जडत्वेन ज्ञानत्वमेव न स्यात्; ततो ज्ञानानन्दयोरपि ज्ञानत्वानन्दत्वासिद्धयेऽत्यन्तमभेदोऽङ्गीकर्तव्यः । इदमपि तैरेवोक्तम्— 'आनन्दत्वे ज्ञानता ज्ञानतायामानन्दत्वं विद्यते निर्विशङ्कम् । सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे ज्ञानसौख्योपपत्तेः ॥' इति । एवं सत्यादानन्दोऽपि यदि भिन्नः स्यादसत्यस्य तस्य शुक्तिरूप्यादेरिवानन्दत्वं न स्यात्; एवं सत्यमपि यद्यानन्दाद्भिन्नं स्याद्दानन्दस्य तस्य शुक्तिरूप्यादेरिव सत्यत्वं न स्यात्; ततः सत्यानन्दयोरप्यत्यन्तमभेदो वक्तव्यः । इदमपि तैरेवोक्तम्— 'आनन्दत्वे सत्यता सत्यतायामानन्दत्वं निर्विवादं प्रसिद्धम् । सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे सत्यसौख्योपपत्तेः ॥' इति । नित्यमुक्तशुद्धत्वादिष्वप्येवमेवोह्यम् । न च तेषामत्यन्ताभेदे तद्वाचकसत्यादिपदानां पर्यायता वाच्या, अर्थानां भेदस्याङ्गीकारात्; सत्य-

पदं मुख्यामुख्यसत्यरूपब्रह्माकाशशबलरूपे सत्ये व्युत्पन्नम्, ज्ञानपदं च चैतन्यान्तःकरणवृत्तिरूपमुख्यामुख्यज्ञानद्वयशबलरूपे ज्ञाने व्युत्पन्नम्, आनन्दपदं च प्रत्यग्बुद्धिवृत्तिरूपमुख्यामुख्यानन्दे व्युत्पन्नम् । एवं नित्यशुद्धादीन्यपि पदानि मुख्यामुख्यतत्तद्द्वयशबलरूपे तस्मिंस्तस्मिन्व्युत्पन्नानीति द्रष्टव्यम् । एतत्सर्वं सर्वज्ञात्ममुनिभिरेवोक्तम्—'आकाशादौ सत्यता तावदेका प्रत्यङ्मात्रे सत्यता काचिदन्या । तत्संपर्कात्सत्यता तत्र चान्या व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र ॥ बुद्धेर्वृत्तौ ज्ञानता तावदेका प्रत्यग्बोधे ज्ञानता काचिदन्या । तत्संपर्काज्ज्ञानता तत्र चान्या व्युत्पन्नोऽयं ज्ञानशब्दस्तु तत्र ॥ बुद्धेर्वृत्तौ तावदानन्दतैका प्रत्यङ्मात्रे काचिदानन्दतान्या । तत्संपर्कात्काचिदानन्दतान्या व्युत्पन्नोऽयं तत्र चानन्दशब्दः ॥' इत्यादिना । ततो वाच्यार्थभेदस्याङ्गीकारान्न पदानां पर्यायतापीति भावः । ननु कथं तर्हि वाच्यार्थभेदे सत्यादीनामसत्यस्ताभेद उक्त इत्याशङ्क्य वाच्यार्थभेदेऽपि तल्लक्ष्यार्थानामभेदादित्याह— तस्मादित्यादिना । यस्मात्सत्यादीनां परस्पराभेदेन सत्यादिरूपत्वं यस्माच्च न पर्यायता तस्मात्, जागर्ति भिदाम्, जगदाकाशाद्युपाधिस्तत्प्रयुक्तां भिदां भेदं विजहदहमखण्ड एवास्मि, एकरस एवास्मि न तु नानारसः । सत्यादिपदैर्भागलक्ष-

या बोधितसत्याद्यात्मकाखण्डैकरसोऽस्मीत्यर्थः । अतः 'एकधैवानुद्रष्टव्यम्' इति श्रुत्युक्तमेकरसत्वमुपपन्नमिति भावः ॥

इदानीमुक्तप्रकारेण जीवस्य ब्रह्मत्वोपपादकैस्तर्कैरनुगृहीतं तत्त्वमस्यादिवाक्यं जीवब्रह्मणोरत्यन्ताभेदं भागत्यागलक्षणया बोधयतीत्याह—

> परोक्षतापरिच्छेद-
> शाबल्यापोहनिर्मलम् ।
> तदासीति गिरा लक्ष्य-
> महमेकरसं महः ॥ २६ ॥

परोक्षता च परिच्छेदश्च तत्प्रयोजकं शाबल्यं च तानि तथोक्तानि, तेषामपोहेन निर्मलं परोक्षतापरिच्छेदशाबल्यापोहनिर्मलम् । परोक्षता परोक्षत्वमीश्वरस्य, परिच्छेदः परिच्छिन्नत्वं जीवस्य । एतद्द्वयं च जीवेश्वरोभयगतविरुद्धधर्माणां सर्वेषामप्युपलक्षणम् । शाबल्यं जीवेश्वरोभयगतपरोक्षत्वपरिच्छिन्नत्वादिप्रयोजकमायान्तःकरणरूपोपाधिनिमित्तसमस्तसंबन्धः । तेषामपोहेन त्यागेन निर्मलं शुद्धम् । ऐक्याविरोधीत्यर्थः । तदसीति गिरा तत्त्वमस्यादिमहावाक्येन लक्ष्यं जहदजहल्लक्षणया बोध्यम् । लक्ष्यस्वरूपमेवाह—एकरसमिति । महः सत्यानन्दचैतन्यरूपमहं प्रत्यगात्मा-

स्मीत्यर्थः । अत्राप्यनुग्राहकयुक्तिः पूर्ववद्द्रष्टव्या—यद्यात्मा ब्रह्मभिन्नः स्यादात्मनः सर्वान्तरत्वलक्षणमात्मत्वं न स्यात्, एवं ब्रह्मापि यद्यात्मभिन्नं स्यान्निरतिशयमहत्त्वलक्षणं ब्रह्मत्वं ब्रह्मणो न स्यात् । इदमपि तैरेवोक्तम्— 'अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्वत्प्रत्यक्त्वे चाद्वयस्यापि भावः । यद्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे तत्त्वमर्थोपपत्तेः ॥' इति । वाक्यार्थभेदादेवोभयोस्तत्त्वंपदयोरपर्यायतापि । इदमपि तैरेवोक्तम्— 'आदेयांशे नाणुमात्रोऽपि भेदो यद्यप्येवं भिन्नमादाय शब्दौ । वर्तेते त्वव्यद्वयात्मप्रकाशे वाह्यं हातुं जामिता नास्ति तस्मात् ॥' इति । वाक्यार्थश्च सकलवेदार्थाभिज्ञेन ब्रह्मणा ब्रह्मगीतायां स्फुटो दर्शितः— 'त्वमहंशब्दवाच्यार्थस्यैव देहादिवस्तुनः । न तच्छब्दार्थतां वक्ति श्रुतिस्तत्त्वमसीति या ॥ तदर्थैक्यविरुद्धांशं त्यक्त्वा वाच्यगतं श्रुतिः । अविरुद्धं चिदाकारं लक्षयित्वा ब्रवीति हि ॥ तदर्थे च त्वमर्थैक्यं विरुद्धांशं विनैव च । कारणत्वादि वाच्यस्थं लक्षयित्वा तु केवलम् ॥ चिदाकारं पुनस्तस्य त्वमर्थैक्यं ब्रवीति च । तत्त्वंशब्दार्थभूतस्य चिन्मात्रस्य परात्मनः ॥ एकत्वं यत्स्वतः सिद्धं स हि वाक्यार्थ आस्तिकाः ॥' इति । तस्माच्छ्रुत्या युक्त्या वृद्धानां वचनाच्च जीवस्य सच्चिदानन्दनित्यशुद्धबुद्धमुक्तस्वरूपता सिद्धेति भावः ॥ २६ ॥

इदानीमुक्तस्वरूपं ब्रह्मात्मत्वेन साक्षात्कुर्वतः पुरुषस्य स्वप्रकाशापरिमितानन्दब्रह्मात्मतावस्थानलक्षणा विदेहमुक्तिः प्रारब्धकर्मक्षयपर्यन्तं देहेन्द्रियादिप्रतिभाससहिता तादृग्ब्रह्मात्मनावस्थानलक्षणा जीवन्मुक्तिश्च फलमित्यभिप्रेत्य प्रकरणमुपसंहरति —

उपशान्तजगज्जीव-
शिष्याचार्येश्वरभ्रमम् ।
स्वतः सिद्धमनाद्यन्तं
परिपूर्णमहं महः ॥ २७ ॥

उपशान्तो जीवन्मुक्त्यवस्थायां बाधितो विदेहमुक्त्यवस्थायां सर्वात्मना निवृत्तो जगज्जीवशिष्याचार्येश्वरलक्षणो भ्रमो यस्मिंस्तत्तादृशम् । मुक्तिद्वयस्य ज्ञानफलत्वं सर्वज्ञात्ममुनिभिरप्युक्तम् — 'जीवन्मुक्तिस्तावदस्ति प्रतीतेर्द्वैतच्छाया तत्र चास्ति प्रतीतेः । द्वैतच्छायारक्षणायास्ति लेशस्तस्मिन्नर्थे स्वानुभूतिः प्रमाणम् ॥ तस्माज्जीवन्मुक्तिरूपेण विद्वानारब्धानां कर्मणां भोगसिद्ध्यै । स्थित्वा भोगं ध्वान्तगन्धं प्रसूनं भुक्त्वात्यन्तं याति कैवल्यमन्ते ॥' इति । स्वतः सिद्धं स्वप्रकाशम्, अनाद्यन्तमाद्यन्तरहितम्, परिपूर्णं सर्वात्मकम् । त्रिविधपरिच्छेदशून्यमित्यर्थः । महस्तेजोऽहमस्मीत्यर्थः ॥ २७ ॥

इदानीमुपनिषत्सारसंग्रहात्मके स्वरचिते प्रकरणे विदुषां प्रवृत्तिं प्रार्थयते—

**लक्ष्मीधरकवेः सूक्ति-**
**शरदम्भोजसंभृतः ।**
**अद्वैतमकरन्दोऽयं**
**विद्वद्भृङ्गैर्निपीयताम् ॥ २८ ॥**

लक्ष्मीधर इति ग्रन्थकर्तुर्नाम, स चासौ कविः सर्वज्ञः क्रान्तदर्शी तस्य सूक्तय एव शरदम्भोजानि तेषु संभृतः संपन्नोऽयं सर्वैरनुभूयमानोऽद्वैतमकरन्दः, अद्वैतं ब्रह्मैव मकरन्दो रसः, 'एतमेव रसं साक्षाल्लब्ध्वा देही सनातनम् । सुखी भवति सर्वत्र नान्यथा सुरपुंगवाः ॥' इति ब्रह्मगीतावचनात् । विद्वद्भृङ्गैः, विद्वांस एव भृङ्गा ब्रह्मरसज्ञास्तैः, निपीयतां नितरामात्माज्ञाननिवृत्तिपर्यन्तं पुनः पुनः सेव्यताम्, 'विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् । अपरोक्षावभासत्वाद्भूयो भूयो विचारयेत् ॥' इति श्रीभारतीतीर्थवचनात् । यद्यप्यत्र प्रतिश्लोकं बहु वक्तव्यमस्ति, तथापि मन्दबुद्धीनामलसानां व्युत्पादनार्थं प्रवृत्तेन मया ग्रन्थकाठिन्यगौरवभयादुपरतमिति ॥ २८ ॥

अद्वैतमकरन्दस्य रसाभिव्यञ्जिका कृता ।
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥ १ ॥

ब्रह्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः ।
रसाभिव्यञ्जिका ह्येषा परिशील्या सदाऽऽदरात् ॥ २ ॥

तापत्रयार्कसंतप्ता मोक्षकामा मुदा सह ।
रसाभिव्यञ्जिकागङ्गामग्ना भवत सत्तमाः ॥ ३ ॥

व्याख्याप्रणीतिच्छलमत्र बुद्धे-
र्ममापराधं विबुधाः क्षमन्ताम् ।
अम्बार्धदेहो भगवानतः स्या-
द्बालापराधात्पितृवत्प्रसन्नः ॥ ४ ॥

श्रीकैवल्यानन्दयोगीन्द्रपाद-
पद्मद्वन्द्वे निःस्रवन्मोक्षसारे ।
शुद्धैर्हंसैः सेविते सुप्रसन्ने
मच्चेतोऽर्थी भृङ्गलीलां विधत्ताम् ॥ ५ ॥

चिदम्भोधिसंमग्नचित्तं गुणानां
सतामालयं शुद्धसत्त्वप्रधानम् ।
नृणां बोधयन्तं परब्रह्मतत्त्वं
शिवानन्दयोगीन्द्रमीडे सदाहम् ॥ ६ ॥